त्रसरेणुः, स्त्री, सूर्य्यभार्य्याविशेषः । इति त्रिकाण्डशेषः ॥

त्रसरेणुः, पुं, (त्रसश्चञ्चलत्वात् भीत इव रेणुः ।) त्रिंशत्परमाणुपरिमाणम् । स गवाक्षान्तर्गतसूर्य्यकिरणे दृश्यते । तत्पर्य्यायः । ध्वंसी २ । यथा, वैद्यकपरिभाषायाम् ।
"जालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते ।
त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभिः ॥"
(द्व्यणुकत्रयात्मकरेणुः । यथा, ब्रह्मवैवर्त्ते ।
"परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः ॥"
तथाच मनुः । ८ । १३२ ।
"जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमन्तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥")

त्रसुरः, पुं, (त्रस्यतीति । त्रस भये + उरच् ।) भीरुकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

त्रस्तः, त्रि, (त्रस भये + क्तः ।) भीतः । इति जटाधरः ॥ (यथा, देवीभागवते ।१।५।२६।
"प्रत्यञ्चायां विमुक्तायां मुक्ता कोटिस्तथोत्तरा ।
शब्दः समभवद्घोरस्तेन त्रस्ताः सुरास्तदा ॥")
शीघ्रे, क्ली । यथा,—
"सविरामं त्रितालञ्च एकं मूल्यन्तथापरे ।
शीघ्रे त्रस्तं त्रितालञ्च देवसार इतीर्य्यते ॥"
इति सङ्गीतदामोदरः ॥

त्रस्नुः, त्रि, (त्रस्यतीति । त्रस भये + "त्रसिगृधिधृषिक्षिपेः क्नुः ।" ३ । २ । १४० । इति क्नुः ।) त्रासशीलः । इत्यमरः । ३ । १ । २६ ॥ (यथा, भट्टिः । ६ । ७ ।
"भीतां सौमित्रिणा त्यक्तां सध्रीचीं त्रस्नुमेकिकाम् ।
विद्यायामस्त काकुत्स्थः क्षये क्षेमं सुदुर्लभम् ॥")

त्रा, ङ पालने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) त्रै ङ पालन इत्यत्र केचिददादौ त्रा पठ्यते । इति क्रमदीश्वरः ॥ इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

त्राणं, क्ली, (त्रै + भावे ल्युट् क्तो वा । नुदविदेति पक्षे नत्वम् ।) रक्षणम् । (यथा, शाकुन्तले १ अङ्के ।
"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ॥"
त्रायते इति कर्त्तरि ल्युः । रक्षिता । यथा, महाभारते । १ । २३ । १८ ।
"त्वं प्रभास्त्वमभिप्रेतं त्वं नक्षत्राणमनुत्तमम् ॥"
तथाच रघौ । १५ । ३ ।
"अवेक्ष्य रामं ते तस्मिन् न प्रजह्रुः स्वतेजसा ।
त्राणाभावे हि शापास्त्राः कुर्व्वन्ति तपसो व्ययम् ॥"
त्रायतेऽनेनेति करणे ल्युट् । कवचम् । अस्त्रम् । यथा, महाभारते । ३ । १६८ । १४ ।
"इंशिता विविधैस्त्राणैर्विचित्रायुधपाणयः ॥")
त्रायमाणालता । रक्षिते, त्रि । इति मेदिनी । णे, १४ ॥

त्राणा, स्त्री, (त्रायते पालयतीति । त्रै + ल्युः । टाप् ।) त्रायमाणा । इति राजनिर्घण्टः ॥

त्रातं, त्रि, (त्रै + क्तः । नुदविदेति नत्वाभावः ।) रक्षितम् । इत्यमरः । ३ । १ । १०६ ॥ (यथा, मार्कण्डेये । ८४ । २२ ।
"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवन्नमस्ते ॥"
भावे क्तः ।) रक्षणे, क्ली ॥

त्रापुषं, त्रि, (त्रपुणा निर्वृत्तम् । त्रपुष + "तेन निर्वृत्तम् ।" ४ । २ । ६८ । इत्यण् ।) त्रपुषनिर्म्मितम् । इति व्याकरणम् ॥ (त्रपुणो विकारः । "त्रपुजतुनोः षुक् ।" ४ । ३ । १३८ । इत्यण् षुगागमश्च । रङ्गस्य विकारः । इति सिद्धान्तकौमुदी ॥)

त्रायन्ती, स्त्री, (त्रै + सम्पदादित्वात् क्विप् । त्रां त्राणं अयतीति । इ गतौ + शतृ । यद्वा, त्रै ङ पालने + क्वचित् आत्मनेपदी धातुरपि परस्मैपदमिच्छतीति न्यायात् शतृ । "उगितश्च ।" इति ङीप् ।) त्रायमाणा लता । इत्यमरः । २ । ४ । १५० ॥ (यथा,—
"त्रायन्ती तु वरा तिक्ता सरा पित्तकफापहा ।
ज्वरहृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) त्राणकर्त्री च ॥

त्रायमाणं, त्रि, (त्रायते इति । त्रै + कर्म्मणि शानच् ।) रक्ष्यमाणम् । इति व्याकरणम् ॥ (यथा, अथर्व्ववेदे । ६ । ४ । १ ।
"त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्त्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः ॥")

त्रायमाणा, स्त्री, (त्रायते इति । त्रै + शानच् ।) बला इति बहुला इति च ख्याता । तत्पर्य्यायः । वार्षिकम् २ त्रायन्ती ३ बलभद्रिका ४ । इत्यमरः ।२।४।१०५॥ क्षतत्रा ५ त्रायमाणिका ६ बलभद्रा ७ सुकामा ८ वार्षिकी ९ गिरिजा १० अनुजा ११ माङ्गल्यार्हा १२ देवबला १३ पालिनी १४ भयनाशिनी १५ अवनी १६ रक्षणी १७ त्राणा १८ । इति राजनिर्घण्टः ॥ सुभद्राणी १९ भद्रनामिका २० । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । मधुरत्वम् । गुल्मज्वरकफास्रभ्रमतृष्णाक्षयग्लानिविषच्छर्दिविनाशित्वञ्च । इति राजनिर्घण्टः ॥ पित्तनाशित्वम् । इति राजवल्लभः ॥ (यथा,—
"पटोलं पिचुमर्द्दञ्च दार्व्वीं कटुकरोहिणीम् ।
पश्याद्रां त्रायमाणाञ्च दद्याद्वीसर्पशान्तये ॥"
इति चरके चिकित्सास्थाने एकादशेऽध्याये ॥)

त्रासः, पुं, (त्रस + भावे घञ् ।) भयम् । इत्यमरः । १।७।२१॥ (यथा आर्य्यासप्तशत्याम् । ३७६ ।
"प्रणयचलितोऽपि सकपटकोपकटाक्षैर्भया-हितस्तम्भः ।
त्रासतरलो गृहीतः सहासरभसं प्रियः कण्ठे ॥")
मणिदोषः । इति मेदिनी । से, ४ ॥

त्रासदायी, [न्] त्रि, (त्रासं भयं ददातीति । दा + णिनिः ।) भयदाता । तत्पर्य्यायः । शङ्करः २ । इति हेमचन्द्रः । ३ । १४३ ॥

त्रिंशः, त्रि, (त्रिंशत् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) त्रिंशतः पूरणः । इति व्याकरणम् ॥ (यथा, तिथ्यादितत्त्वे ।
"त्रिंशांशकस्तथा राशिभाग इत्यभिधीयते ॥")

त्रिंशकः, त्रि, त्रिंशत्सम्बन्धः । सम्बन्धार्थे डकप्रत्ययः । इति सुपद्मव्याकरणम् ॥ (त्रिंशता क्रीतः । त्रिंशत् + "विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ।" ५ । १ । २४ । इति असंज्ञायां ड्वुन् । त्रिंशत्संख्यकद्रव्येण क्रीतः । इति सिद्धान्तकौमुदी ॥)

त्रिंशत्, स्त्री, (त्रयोदशतः परिमाणमस्य । "पङ्क्तित्रिंशदिति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) संख्याविशेषः । त्रिश इति भाषा । एकवचनान्तोऽयम् । त्रिंशद्द्वये त्रिंशतौ । त्रिंशतो बहुत्वे त्रिंशतः । इति व्याकरणम् ॥ (यथा, मनुः । १ । २२ ।
"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कलाः ।
त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः ॥")

त्रिंशत्पत्त्रं, क्ली, (त्रिंशत्संख्यकानि पत्त्राणि दलानि यस्य ।) कुमुदम् । इति शब्दमाला ॥

त्रिकं, क्ली, (त्रयाणां सङ्घः । "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ।" ५।१।५८। इति कन् ।) पृष्ठवंशाधरः । इत्यमरः ।२।६ । ७६ ॥ (यथा, माघे । १२ । १० ।
"नस्या गृहीतोऽपि धुवन्विषाणयो-
र्युगं ससूत्कारविवर्त्तितत्रिकः ॥")
त्रयम् । इति मेदिनी । के, २६ ॥ (यथा, मनुः । ७ । ५१ ।
"दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥")
त्रिपथसंस्थानम् । इति हेमचन्द्रः । ४ । ५२ ॥
त्रिफला । त्रिकटु । त्रिमदः । यथा, सुखबोधे ।
गुडूचीसारसंयुक्तास्त्रिकत्रयसमन्वयात् ।
वातरक्तं निहन्त्याशु सर्व्वरोगहरन्त्वयः ॥"
(तृतीयेन रूपेण ग्रहणं यस्य । तृतीय + "तावतिथं ग्रहणमिति लुग्वा ।" ५ । २ । ७७ । इति कन् पूरणप्रत्ययस्य च लुक् । तृतीयके, त्रि । यथा, मनुः । ८ । १४२ ।
"द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम् ।
मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्व्वशः ॥")

त्रिककुत्, [द्] पुं, (त्रीणि ककुत्-सदृशानि ध्वजतुल्यानि शृङ्गाणि यस्य ।) त्रिकूटपर्व्वतः । इत्यमरः । २।३।२ ॥ (यथा, शतपथब्राह्मणे । ३ । १ । ३ । १२ । "यत्र वा इन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत् ॥" विष्णोर्नामविशेषः । यथा, महाभारते । १२ । ३४२ । ९० ।
"तथैवासं त्रिककुदो वाराहं रूपमास्थितः ।
त्रिककुत्तेन विख्यातः शरीरस्य प्रमापणात् ॥"